।। श्रीमते रामानुजाय नमः।। ॐ ।। श्रीवेदपुरुषाय नमः।।

श्रीनिवास सेवार्थ न्यास द्वारा संचालित निःशुल्क आवासीय

श्रीनिवास संस्कृत विद्यापीठम्

174, रामानुज मार्ग, इब्राहिमपुर, दिल्ली–110036

दैनिक सन्ध्या, हवन एवं आरती

॥श्रीमते रामानुजाय नमः॥
॥श्रियै नमः॥श्रीधराय नमः॥

॥ संध्योपासनविधिः॥

स्वाचार्यं श्रीधरं शान्तं षडाचार्यं यतिं गुरुम्।
श्रीनिवासं मुक्तिनारायणं रामानुजं भजे॥

ॐ विष्णोर्नुकं वीर्याणि प्रवोचंय्यः पार्थिवा निव्विम मे रजाꣳसि।
यो अस्कभायदुत्तर ꣳ सधस्थं विचक्रमाणस्तेधोरुगायो व्विष्णवे त्वा॥

ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्।
ॐ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो लक्ष्मीः प्रचोदयात्॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥१॥

भूमिशुद्धिः -

पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसने विनियोगः॥२॥

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥३॥

पवित्रीधारणम्-

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥४॥

शिखाबन्धनम्-

ॐ मानस्तोकेतनयेमान आयुषिमानो गोषुमानो अश्वेषुरीरिषः।
मानो व्वीरानुद्रभामिनोबधीर्हविष्मन्तः सदमित्त्वाहवामहे।

चिद्रूपिणि महामाये दिव्यतेजः समन्विते।
तिष्ठ देवि शिखामध्ये तेजोवृद्धिं कुरुष्व मे॥५॥

आचमनम्-

ॐ केशवाय नमः। ॐ नारायणाय नमः। ॐ माधवाय नमः।

ॐ गोविन्दाय नमः (हस्तप्रक्षलनाय)

संकल्पः-

हरिः ॐ तत्सत् विष्णुर्विष्णुर्विष्णुः, अद्येह श्रीमद्भगवतो महापुरुषस्य श्रीभूमिनीलानायकस्य महाविष्णो- राज्ञया प्रवर्तमानस्य परार्द्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे अस्मिन् भूर्लोके जम्बुद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गत इन्द्रप्रस्थक्षेत्रे देहलीमहानगर्य्यां यमुनानद्याः पश्चिमदिग्भागे इब्राहिमपुरग्रामे श्रीरामानुजमार्गे श्रीनिवास संस्कृतविद्यापीठे भगवतः सन्निधौ षष्टिसंवत्सराणां मध्ये ...नामकसंवत्सरे....अयने ...ऋतौ मासानां मासोत्तममासे ....मासे....पक्षे...तिथौ....वासरे ...नक्षत्रे ....योगे.... लग्ने ... करणे ... राशिस्थिते श्रीसूर्ये....राशिस्थिते श्रीचन्द्रे .....राशिस्थिते श्रीदेवगुरौ यथा यथा राशिस्थानेषु स्थितेषु सत्सु ग्रहेषु एवं ग्रहगुणविशेषणविषिष्टायां शुभपुण्यतिथौ अद्येह. ....गोत्रोत्पन्नः.....प्रवरान्वितः .....शाखाध्यायी.... रामानुजदासोऽहं श्रीभगवतो बलेन भगवतो वीर्येण भगवतस्तेजसा श्रीभगवद्भागवताचार्यमुखोल्लासार्थं भगवत्कैङ्कर्यादिसिद्ध्यर्थं ब्रह्मवर्चस्वप्राप्तये च प्रातः/सायं कालिकसन्ध्योपासनमहं करिष्ये।

प्राणायामः -

ॐकारस्य ब्रह्मा ऋषिर्दैवी गायत्रीच्छन्दः, परमात्मा देवता सप्तव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुब्बृहती- पंक्तित्रिष्टुब्जगत्यश्छन्दांसि, अग्निवायुसूर्यबृहस्पतिवरुणेन्द्र- विश्वेदेवा देवताः, तत्सवितुरिति विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता, आपोज्योतिरिति शिरसः प्रजापतिर्ऋषिर्यजुश्छन्दो ब्रह्माग्निवायुसूर्या देवताः सर्वेषां प्राणायामे विनियोगः॥

प्राणायामः-

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम्।

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात्।

ॐ आपोज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्॥

अपामुपस्पर्शनम्:-

सूर्यश्चमेति नारायण ऋषिः प्रकृतिश्छन्दः सूर्यमन्युमन्युपतयो रात्रिश्च देवता अपामुपस्पर्शने विनियोगः ॥

ॐ सूर्यश्च मा मन्युश्च मन्युपंतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्। यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु। यत्किञ्च दुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा॥

मार्जनम्:-

ॐ आपो हिष्ठेति त्र्यृचस्य सिन्धुद्वीप ऋषिर्गायत्रीच्छन्द आपो देवता मार्जने विनियोगः॥

ॐ आपोहिष्ठा मयोभुवः ता न ऊर्जे दधातन महेरणाय चक्षसे।
यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरस्तस्मा
अरङ्गमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः॥

शिरःसेचनम्:-

द्रुपदादिवेत्यस्य अश्विसरस्वतीन्द्रा ऋषयः, अनुष्टुप्छन्दः, आपो देवता, शिरःसेचने विनियोगः।

ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव।
पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः॥

अघमर्षणम्:-

ऋतञ्चेतिमन्त्रस्य माधुच्छन्दसोऽघमर्षण ऋषिनरुष्टुप् छन्दो भाववृत्तं दैवतमघमर्षणे विनियोगः॥

ॐ ऋतञ्चसत्यञ्चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत। ततः समुद्रोऽअर्णवः। समुद्रादर्णवादधिसंवत्सरोऽअजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी। सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः॥

अपामुपस्पर्शनम्:-

अन्तश्चरसीति तिरश्चीन ऋषिरनुष्टुप् छन्द आपो देवता अपामुपस्पर्शनेविनियोगः॥

ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः।
त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतम्॥

सूर्यार्घ्यदानम् :-

ॐ कारस्य ब्रह्मा ऋषिर्दैवी गायत्रीच्छन्दः, परमात्मा देवता, तिसृणां महाव्याहृतीनां प्रजापति र्ऋर्षिर्गायत्र्युष्णिगनुष्टुभश्छन्दांस्यग्निवायुसूर्या देवताः, तत्सवितुरिति विश्वामित्रर्ऋषिर्गायत्रीच्छन्दः सविता देवता सूर्यार्घ्यदाने विनियोगः॥

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥

सूर्योपस्थानम् :-

उद्वयमिति प्रस्कण्व ऋषिरनुष्टुप्छन्दः सूर्यो देवता, उदुत्यमिति प्रस्कण्व ऋषिर्निचृद्गायत्रीच्छन्दः सूर्यो देवता, चित्रमिति कुत्सांगिरस ऋषिस्त्रिष्टुप् छन्दः सूर्यो देवता, तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिरेकाधिका ब्राह्मी त्रिष्टुप्छन्दः सूर्यो देवता सर्वेषां सूर्योपस्थाने विनियोगः॥

ॐ उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्। देवं देवत्र सूर्यमगन्म ज्योतिरुत्तमम्॥

ॐ उदुत्यंजातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्॥

ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्राद्यावापृथिवी अन्तरिक्षꣳसूर्य आत्मा जगतस्तस्थुषश्च॥ ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतञ्जीवेम शरदः शतꣳश्रृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥

गायत्र्यावाहनम् :-

तेजोऽसीति धामनामासीत्यस्य च परमेष्ठी प्रजापति ऋषिर्यजुस्त्रिष्टुबुष्णिहौ छन्दसी सविता देवता गायत्र्यावाहने विनियोगः॥

ॐ तेजोऽसि शुक्रमस्यमृतमसि। धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि॥२७॥

गायत्र्युपस्थानम् :-

गायत्र्यस्येकपदीति विवस्वान् ऋषिः स्वराणमहापङ्क्तिश्छन्दः परमात्मा देवता गायत्र्युपस्थाने विनियोगः॥

ॐ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसी। न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसेऽसावदो मा प्रापत्।

जप-विनियोगः-

ॐकारस्य ब्रह्मा ऋषिर्दैवी गायत्री छन्दः परमात्मा देवता तिसृणां महाव्याहृतीनां प्रजापतिर्ऋर्षिर्गायत्र्युष्णिगनुष्टुभश्छन्दांस्यग्निवायुसूर्या देवताः तत्सवितुरिति विश्वामित्रऋषिर्गायत्रीच्छन्दः सविता देवता जपे विनियोगः॥

क्षमा-प्रार्थना :-

ॐ भो देवि गायत्रि! त्वं ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव॥

मुद्राः-

सुमुखं सम्पुटं चैव विततं विस्तृतं तथा।
एकद्वित्रिमुखं चैव चतुष्पञ्चमुखं तथा॥
षण्मुखाऽधोमुखञ्चैव व्यापकाञ्जलिकं तथा।
शकटं यमपाशं च ग्रथितं चोन्मुखोमुखम्॥
प्रलम्बं मुष्टिकं चैव मत्स्यः कूर्मो वराहकम्।
सिंहाक्रान्तं महाक्रान्तमुद्गरं पल्लवं तथा॥

न्यासः-

कपोलयोः	ॐ केशवाय नमः। ॐ नारायणाय नमः।
नासापुटयोः	ॐ माधवाय नमः। ॐ गोविन्दाय नमः।
नेत्रयोः	ॐ विष्णवे नमः। ॐ मधुसूदनाय नमः।
कर्णयोः	ॐ त्रिविक्रमाय नमः। ॐ वामनाय नमः।
स्कन्धयोः	ॐ श्रीधराय नमः। ॐ हृषीकेशाय नमः।
नाभौ शिरसि च	ॐ पद्मनाभाय नमः। ॐ दामोदराय नमः।
नमस्कारमुद्रायां	ॐ वासुदेवाय नमः॥
हृदयादिन्यासः	ॐ भूः ज्ञानाय हृदयाय नमः।
	ॐ भुवः शिरसे स्वाहा।
	ॐ स्वः शिखायै वौषट्।
	ॐ तत्सवितुर्वरेण्यम् कवचाय हुम्।
	ॐ भर्गो देवस्य धीमहि नेत्राभ्यां वौषट्।
	ॐ धियो यो नः प्रचोदयात् वीर्याय अस्त्राय फट्॥
करन्यासः-	ॐ भूः अङ्गुष्ठाभ्यां नमः।
	ॐ भुवः तर्जनीभ्यां नमः।
	ॐ स्वः मध्यमाभ्यां नमः।
	ॐ तत्सवितुर्वरेण्यम् अनामिकाभ्यां नमः।
	ॐ भर्गो देवस्य धीमहि कनिष्ठिकाभ्यां नमः।
	ॐ धियो योनः प्रचोदयात् करतलकरपृष्ठाभ्यां नमः॥

गायत्रीध्यानम् -

श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा।
श्वेतेर्विलैपनैः पुष्पैरलङ्कारैश्च भूषिता।।
आदित्यमण्डलस्था च ब्रह्मलोकगता शुभा।
अक्षसूत्रधरा देवी पद्मासनगता स्थिता।।
मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैः
युक्तामिन्दुकलानिबद्धमुकुटां तत्त्वार्थवर्णात्मिकाम्।
गायत्रीं वरदां भयाङ्कुशकशां शुभ्रं कपालं गदाम्।
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे।।

मालाप्रार्थना-

ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।।
ॐ अविघ्नं कुरु माले त्वं गृह्णामि दक्षिणे करे।
जपकाले च सिद्ध्यर्थं प्रसीद मम सिद्धये ।।
ॐ तुलसीमालाधिपतये सुसिद्धिं देहि देहि
सर्वमन्त्रार्थसाधिनि साधय साधय
सर्वमन्त्रार्थसिद्धिं परिकल्पय परिकल्पय मे स्वाहा।।

जपमन्त्रः-

ॐ भूर्भवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्

अष्टमुद्रा-

मत्स्यः कूर्मो वराहश्च शङ्खं चक्रं सशस्त्रकम्।
गदा पद्मो भवेदष्टौ अष्टमुद्राः प्रकीर्तिताः।

विनियोगः-

विश्वतश्चक्षुरिति भौवन ऋषिस्त्रिष्टुप्छन्दो विश्वकर्मा देवता सूर्यप्रदक्षिणाया विनियोगः।

ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एकः।।
यानि कानि च पापानि जन्मान्तरकृतानि च।
तानि सर्वाणि नश्यन्तु प्रदक्षिणा पदे पदे।।

जपनिवेदनम् :-

ॐ देवा गातुविद इति मनसस्पतिर्ऋषिर्विराडनुष्टुप्छन्दो वातो देवता जपनिवेदने विनियोगः॥

ॐ देवा गातुविदो गातुं वित्त्वा गातुमित।
मनसस्पत इमं देव यज्ञꣳस्वाहा व्वाते धाः॥

अनेन गायत्रीजपाख्येन कर्मणा भगवान् श्रीमन्नारायणः प्रीयतां न मम।

गायत्रीविसर्जनम् :-

उत्तमे शिखर इति वामदेव ऋषिरनुष्टुप्छन्दः गायत्री देवता गायत्रीविसर्जने विनियोगः।

ॐ उत्तमे शिखरे देवि भूम्यां पर्वतमूर्धनि।
ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम्॥

अनेन सन्ध्योपासनाख्येन कर्मणा भगवान् श्रीसूर्यनारायणः प्रीयतां न मम।

यस्य स्मृत्या च नामोक्त्या तपस्सन्ध्याक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि॥

यदक्षरपदभ्रष्टं मात्राहीनं यद्भवेत्।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते॥

। श्रीविष्णवे नमः३।

ॐ तत्सत्परब्रह्मार्पणमस्तु॥

॥ आचार्यादिस्मरणम् ॥

अस्मद्देशिकमस्मदीयपरमाचार्यानशेषान् गुरून्
श्रीमल्लक्ष्मणयोगिपुङ्गवमहापूर्णौ मुनिं यामुनम्।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये॥

सुधीन्द्रं कौण्डिन्यं श्रुतिपथवितानाग्र निरतं,
षडाचार्यात्प्राप्तं द्वयमनुवरं श्रीधरगुरोः।
शठारेरब्जाक्षस्य च वरकृपाप्राप्तमनघं,
भजेऽहं गोविन्दं गुरुवरगणाग्र्यं कुलपतिम्॥

आत्रेयान्वयदुग्धवारिधिविधुं श्रीमुक्तिनारायणं
शालग्रामनिदर्शनाच्छुकगुरोः श्रीपादपद्माश्रितम्।
गोपालार्यगुरोरवाप्तनिगमञ्चाणङ्गरार्याद् गुरोः
वन्दे श्रीशठकोपयोगिकृपया तुर्याश्रमाप्तं गुरुम्॥

प्रतिज्ञा

पठनात् पाठनाच्चैव प्रचाराद् व्यवहारतः।
रक्षिष्यामि प्रयत्नेन स्वीयं सारस्वतं निधिम्॥
मनूपदिष्टमार्गेण विद्याचारित्र्यसंयुतः।
चरित्रं शिक्षयिष्यामि पृथिव्यां सर्वमानवान्॥
हिताय सर्वजगतः भारतीयार्यसंस्कृतिम्।
पुनः प्रचारयिष्यामि समस्ते पृथिवीतले॥
सर्वान् सामाजिकान् दोषान् कुरीतिरखिलाँस्तथा।
नाशयित्वा समाजं स्वं विधास्यामि समुज्ज्वलम्॥
सर्वं प्राञ्चं तथा नव्यं ज्ञानं विज्ञानमेव च।
ज्ञात्वा सम्यग्गुणैस्तेषां साधयिष्ये जगद्धितम्॥
ज्ञानं सत्यं सदाचारं स्नेहं न्यायं च सर्वतः।
स्थापयित्वा करिष्यामि सुखशान्तिमयं जगत्॥
आत्मज्ञानेन विज्ञानं सदाचारेण शिक्षणम्।
बुद्ध्या धर्मञ्च संयोज्य करिष्ये विश्वमङ्गलम्॥
त्यक्त्वा सङ्कीर्णतां सर्वां सदा भूमानमास्थितः।
उच्चलक्ष्यो विशालात्मा वर्तिष्ये लोकसंग्रहम्॥
नेतृत्वं शासनं शस्त्रं सेवां साहित्यमेव वा।
गृहीत्वा राष्ट्रसेवायां चरिष्ये व्रतमुत्तमम्॥
समस्तपरिवारविशिष्टाय सर्वदिव्यमङ्गलविग्रहाय
श्रीमते नारायणाय नमः॥

॥श्रीमते रामानुजाय नमः॥
॥श्रियै नमः॥श्रीधराय नमः॥
॥श्रीविजयलक्ष्मीसमेतसुदर्शनचक्रराजपरब्रह्मणे नमः॥

नित्यहवनविधि

स्वाचार्यं श्रीधरं शान्तं षडाचार्यं यतिं गुरुम्।
श्रीनिवासमुक्तिनारायणं रामानुजं भजे॥

शरीरे जलसेचनम्-

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥
ॐ पुण्डरीकाक्षः पुनातु-३।

आसनपवित्रीकरणम्-

ॐ पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः, सुतलं छन्दः कूर्मो देवता आसने विनियोगः।
ॐ पृथ्वि! त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥

आचमनम्-

ॐ केशवाय नमः, ॐ नारायणाय नमः, ॐ माधवाय नमः।
(हस्तप्रक्षालनाय- ॐ गोविन्दाय नमः।)

पवित्रीधारणम्-

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥

अग्निस्थापनम्-

ॐ अग्निदूतं पुरोदधे हव्यवाहमुपब्रुवे। देवाँ आसादयादिह।
ॐ भूर्भुवःस्वः अग्ने वैश्वानर मम सम्मुखो भव।
आवाहये त्वां पुरुषं महान्तं सुरासुरैर्वन्दितपादपद्मम्।

ब्रह्मादयो यस्य मुखे विशन्ति प्रविश्य कुण्डे सुरलोकनाथ॥

ॐ हं नमः अग्नये शुचिषदे, अग्नेगर्भधानादिषोडशसंस्कारान् सम्पादयामि इति वदन् षोडशवारं पीताक्षतान् विकिरेत्।

ॐ भूर्भुवःस्वः अग्नये नमः इत्यग्निं कुण्डस्य नैर्ऋत्यकोणे षोडशोपचारैः सम्पूज्य प्रार्थयेत्-

अग्निं च ज्वलितं वन्दे जातवेदं हुताशनम्।
हिरण्यवर्णममलं समृद्धं सर्वतोमुखम्॥
ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः।
स बुध्न्या उपमा अस्य विस्ठाः सतश्च योनिमसितश्च विवः।
अस्मिन् होमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुं त्वं मे ब्रह्मा भव

अग्नेरष्टदिक्षु अष्टवसून् पीताक्षतैरावाह्य पूजयेत्-

पूर्वे- ॐ अग्नये नमः अग्निमावाहयामि।
आग्नेये- ॐ जातवेदसे नमः जातवेदसमावाहयामि।
दक्षिणे- ॐ सहोजसे नमः सहोजसमावाहयामि।
नैर्ऋते- ॐ अजिराप्रभवे नमः अजिराप्रभुमावाहयामि।
पश्चिमे- ॐ वैश्वानराय नमः वैश्वानरमावाहयामि।
वायव्ये- ॐ नर्यापसे नमः नर्यापसमावाहयामि।
उत्तरे- ॐ पङ्क्तिराधसे नमः पङ्क्तिराधसमावाहयामि।
ऐशान्ये- ॐ विसर्पिणे नमः विसर्पिणमावाहयामि।

दर्भपरिस्तरणम् -

पूर्वदिशि अक्षतान् क्षिपे

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।

दक्षिण- ॐ इषेत्वोर्ज्जेत्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमायकर्मणऽआप्यायध्वमग्घ्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामा वस्तेनऽईशतमाघशꣳसो ध्रुवाऽअस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून् पाहि।

पश्चिम- ॐ अग्नऽआयाहि वीतये गृण्णानो हव्यदातये। निहोता सत्सि बर्हिषि।

उत्तर- ॐ शन्नो देवीरभीष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः।
आवाहयाम्यहं देवं स्रुवं शेवधिमुत्तमम्।
स्वाहाकारस्वधाकारवषट्कारसमन्वितम्।

परिसेचनम् –

ॐ अदितेऽनुमन्यस्व (अग्नेर्दक्षिणतः प्रागग्रां जलधारां दद्यात्)

ॐ अनुमतेऽनुमन्यस्व (पश्चिमत उत्तराग्रां जलधारां दद्यात्)

ॐ सरस्वतेऽनुमन्यस्व (उत्तरतः प्रागग्रां जलधारां दद्यात्)

ॐ देवसवितः प्रसुवः (अग्नेः समन्ततो जलधारां दद्यात्)

होमः –

ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम इत्युच्चैः प्रोक्षण्यां त्यागः।

ॐ अग्नये स्वाहा, इदमग्नये न मम

ॐ सोमाय स्वाहा, इदं सोमाय न मम।

ॐ इन्द्राय स्वाहा, इदमिन्द्राय न मम॥

ॐ भूः स्वाहा, इदमग्नये न मम।

ॐ भुवः स्वाहा, इदं वायवे न मम।

ॐ स्वः स्वाहा, इदं सूर्याय न मम।

यथा बाणप्रहाराणां कवचं वारकं भवेत्।
तद्वद्दैवोपघातानां शान्तिर्भवतु वारिका॥

ॐ शान्तिरस्तु, पुष्टिरस्तु, तुष्टिरस्तु, यत्पापरोगाद्यकल्याणं तद्दूरे प्रतिहतमस्तु, द्विपदे चतुष्पदे सुशान्तिर्भवतु॥

सर्वप्रायश्चित्तसंज्ञकाहुतयः –

ॐ त्वन्नोऽअग्ने व्वरुणस्य विद्वान् देवस्य हेडो अवयासि सीष्ठाः।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुध्यस्मत्स्वाहा।
इदमग्नीवरुणाभ्यां न मम।

ॐ सत्वन्नोऽअग्नेऽवमो भवोती नेदिष्टो अस्या उषसो व्युष्टौ।
अवयक्ष्व नो वरुणꣳरराणो वीहि मृडीकꣳसुहवो न एधि स्वाहा।
इदमग्नीवरुणाभ्यां न मम।

ॐ अयाश्चाग्नेऽस्य नभिशस्तिपाश्च सत्यमित्वमया असि।
अयानो यज्ञं वहास्यमानो धेहि भेषजꣳस्वाहा।
इदमग्नये न मम।

ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः।
तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चतु मरुतः स्वर्काः स्वाहा।
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।

ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमᳪ श्रथाय।
अथा वयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा।
इदं वरुणाय न मम।
ॐ विश्वकर्मन् हविषा वावृधान स्वयं यजस्व पृथिवीमुतद्याम्।
मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकं मघवा सूरिरस्तु॥
विष्वक्सेनाय स्वाहा।

अग्नेर्जिह्वानामभिर्होमः -

ईशानादिक्रमेण- ॐ प्रभायै नमः स्वाहा। ॐ दीप्त्यै नमः स्वाहा।
ॐ प्रकाशायै नमः स्वाहा। ॐ मरीच्यै नमः स्वाहा।
ॐ तापिन्यै नमः स्वाहा। ॐ करालायै नमः स्वाहा।
ॐ लेलिहायै नमः स्वाहा।

पुरुषसूक्तहोमः -

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिᳪसर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥१॥
ॐ पुरुषाय नारायणाय स्वाहा (प्रतिमन्त्रं वदेत्)
ॐ पुरुष एवेदᳪसर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति॥२॥
ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥३॥
ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि॥४॥
ॐ ततो विराडजायत विराजोऽअधि पूरुषः।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥५॥
ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम्।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये॥६॥
ॐ तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दाᳪसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥७॥
ॐ तस्मादश्वाऽअजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः॥८॥

ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषञ्जातमग्रतः।
तेन देवाऽअयजन्त साध्या ऋषयश्च ये॥९॥
ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्यासीत् किम्बाहू किमूरू पादा उच्येते॥१०॥
ॐ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्याॐशूद्रोऽअजायत॥११॥
ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥१२॥
ॐ नाभ्याऽआसीदन्तरिक्षॐशीर्ष्णो द्यौःसमवर्तत।
पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन्॥१३॥
ॐ यत्पुरुषेण हविषा देवा यज्ञमन्वत।
वसन्तोऽस्यासीदाज्यङ् ग्रीष्म इध्मः शरद्धविः॥१४॥
ॐ सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञन्तन्वानाऽअबध्नन् पुरुषम्पशुम्॥१५॥
ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥१६॥
ॐ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे॥१७॥
ॐ वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसः परस्तात्।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥१८॥
ॐ प्रजापतिश्चरति गर्भेऽअन्तरजायमानो बहुधा विजायते।
तस्य योनिम्परिपश्यन्ति धीरास्तास्मिन् ह तस्थुर्भुवनानि विश्वा॥
ॐ यो देवेभ्यऽआतपति यो देवानाम्पुरोहितः।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये॥२०॥
ॐ रुचं ब्राह्मञ्जनयन्तो देवाऽअग्रे तदब्रुवन्।
यस्त्वैवम्ब्राह्मणो विद्यात्तस्य देवाऽअसन्वशे॥२१॥
ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्म इषाण॥२२॥

श्रीसूक्तहोमः -

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातेवेदो म आ वह॥१॥
ॐ श्रीं श्रियै नमः (प्रतिमन्त्रमुच्चारयेत्)
ॐ ताम्म आ वह जातवेदों लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वम्पुरुषानहम्॥२॥
ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्।
श्रियन्देवीमुपह्वये श्रीर्मा देवी जुषताम्॥३॥
ॐ कां सोस्मितां हिरण्यप्राकारामार्द्राञ्ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णान्तामिहोपह्वये श्रियम्॥४॥
ॐ चन्द्राम्प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
ताम्पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतान्त्वां वृणे॥५॥
ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्या अलक्ष्मीः॥
ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥७॥
ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिञ्च सर्वान्निर्णुद मे गृहात्॥८॥
ॐ गन्धद्वारान्दुराधर्षां नित्यपुष्टाङ्करीषिणीम्।
ईश्वरीं सर्वभूतानान्तामिहोपह्वये श्रियम्॥९॥
ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥१०॥
ॐ कर्दमेन प्रजा भूता मयि सम्भव कर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥११॥
ॐ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीम्मातरं श्रियं वासय मे कुले॥१२॥
ॐ आर्द्राम्पुष्करिणीम्पुष्टिम्पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीञ्जातवेदो म आ वह॥१३॥
ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीञ्जातवेदो म आ वह॥१४॥

ॐ ताम्म आ वह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतङ्गावो दास्योऽश्वान् विन्देयम्पुरुषानहम्॥१५॥
ॐ यः शुचिः प्रयतो भूत्वा जुहूयादाज्यमन्वहम्।
सूक्तम्पञ्चदशर्चञ्च श्रीकामः सततञ्जपेत्॥१६॥
ॐ पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि।
विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मम्मयि सन्निधत्स्व॥१७॥
ॐ पद्मानने पद्मऊरू पद्माक्षि पद्मसम्भवे।
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम्॥१८॥
ॐ अश्वदायी गोदायी धनदायी महाधने।
धनम्मे जुषतान्देवि सर्वान् कामाँश्च देहि मे ॥१९॥
ॐ पुत्रपौत्रधनन्धान्यं हस्त्यश्वादिगवेरथम्।
प्रजानाम्भवसि माता आयुष्मन्तङ्करोतु माम्॥२०॥
ॐ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः।
धनमिन्द्रो बृहस्पतिर्वरुणो धनमस्तु मे॥२१।
ॐ वैनतेय सोमम्पिब सोमम्पिबतु वृत्रहा।
सोमन्धनस्य सोमिनो मह्यन्ददातु सोमिनः॥२२॥
ॐ न क्रोधो न च मात्सर्यन्न लोभो नाशुभा मतिः।
भवन्ति कृतपुण्यानाम्भक्तानां श्रीसूक्तञ्जपेत्॥२३॥
ॐ सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम्॥२४॥
ॐ विष्णुपत्नीं क्षमान्देवीम्माधवीम्माधवप्रियाम्।
लक्ष्मीम्प्रियसखीन्देवीन्नमाम्यच्युतवल्लभाम्॥२५॥
ॐ महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि।
तन्नो लक्ष्मीप्रचोदयात्॥
ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥२६॥

भूसूक्तहोमः -

ॐ भूमिर्भूम्ना द्यौर्वरिणान्तरिक्षं महित्त्वा।
उपस्थेते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे॥१॥
ॐ भूं भूदेव्यै स्वाहा।
ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरं पुनः। पितरञ्च प्रयन्त्सुवः॥२॥

ॐ त्रिꣳशद्धाम विराजति वाक्पतङ्गाय शिश्रिये। प्रत्यस्य वहद्युभिः॥३॥
ॐ अस्य प्राणादपानत्यन्तश्चरति रोचना। व्यख्यन्महिषः सुवः॥४॥
ॐ यत्त्वा क्रुद्धः परो वपमन्युना यदवर्त्या।
सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि॥५॥
ॐ यत्ते मन्युपरोप्तस्य पृथिवी मनुदध्वसे।
आदित्या विश्वे तद्देवा वसवश्च समाभरन्॥६॥
ॐ मेदिनी देवी वसुन्धरा स्याद्वसुधा देवी वासवी।
ब्रह्मवर्चसः पितृणां श्रोत्रं चक्षुर्मनः॥७॥
ॐ देवी हिरण्यगर्भिणी देवी प्रसूवरी सदने सत्यायने सीद॥८॥
ॐ समुद्रवती सावित्री हनो देवी मद्यवी मही।
धरणी महोव्यधिष्ठा श्रृङ्गे श्रृङ्गे यज्ञे यज्ञे विभीषणी॥९॥
ॐ इन्द्रपत्नी व्याजिनी सुरसित इह वायुमती जलशयनी।
श्रियन्धाराजा सत्यन्तोपरि मेदिनी श्वोपरिधत्तङ्गाय॥१०॥
ॐ विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्।
लक्ष्मीं प्रियसखीं देवी नमाम्यच्युतवल्लभाम्॥११॥
ॐ धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि। तन्नो धरा प्रचोदयात्॥१२॥
ॐ भूं भूदेव्यै स्वाहा।

नीलासूक्तहोमः -

ॐ नीला देवीꣳ शरणमहं प्रपद्ये, सुतरासि तरसे नमः॥१॥
ॐ नीं नीलादेव्यै नमः स्वाहा॥
ॐ गृणाहि घृतवतो सवितराधिपत्यै पयस्वतीरन्तिराशानो अस्तु ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोतौ। बृहस्पतिर्मातरिश्वोत वायुस्सन्धुवांना वाता अभिनो गृणन्तु। विष्टम्भो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी॥२॥ ॐ नीं नीलादेव्यै नमः स्वाहा॥
ॐ महादेव्यै च विद्महे विष्णुपत्न्यै धीमहि।
तन्नो नीला प्रचोदयात्॥ ॐ नीं नीलादेव्यै नमः स्वाहा॥३॥
ॐ नमो नारायणाय स्वाहा।
ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाꣳसुरे स्वाहा।
ॐ भूर्भवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात् स्वाहा। (11 वारम्)
ॐ गायत्रीत्रिष्टुब्जगत्यनुष्टुब्पङ्क्त्यासह बृहत्युष्णिहा ककुप्सूचिभिः सम्यन्तुत्वा।

भगवतश्चतुर्विंशभिः होमः -

ॐ केशवाय नमः ॐ नारायणाय नमः ॐ माधवाय नमः
ॐ गोविन्दाय नमः ॐ विष्णवे नमः ॐ मधुसूदनाय नमः
ॐ त्रिविक्रमाय नमः ॐ वामनाय नमः ॐ श्रीधराय नमः
ॐ हृषीकेशाय नमः ॐ पद्मनाभाय नमः ॐ दामोदराय नमः
ॐ वासुदेवाय नमः ॐ संङ्कर्षणाय नमः ॐ प्रद्युम्नाय नमः
ॐ अनिरुद्धाय नमः ॐ पुरुषोत्तमाय नमः ॐ अधोक्षजाय नमः
ॐ नारसिंहाय नमः ॐ जनार्दनाय नमः ॐ उपेन्द्राय नमः
ॐ हरये नमः ॐ श्रीकृष्णाय नमः
ॐ रुक्मिणीसत्यभामाभ्यां समेतश्रीवेणुगोपालस्वामिने नमः॥

महालक्ष्म्यानामभिर्होमः -

ॐ श्रियै नमः ॐ अमृतोद्भवायै नमः ॐ कमलायै नमः
ॐ चन्द्रसहोदर्यै नमः ॐ विष्णुपत्न्यै नमः ॐ वैष्णव्यै नमः
ॐ वरारोहायै नमः ॐ हरिवल्लभायै नमः ॐ शार्ङ्गिण्यै नमः
ॐ देवदेविकायै नमः ॐ लोकसुन्दर्यै नमः ॐ महालक्ष्म्यै नमः।
ॐ श्री देव्यै नमः ॐ भूदेव्यै नमः। ॐ नीलादेव्यै नमः
ॐ गोदादेव्यै नमः। ॐ श्री रङ्गनायक्यै महालक्ष्म्यै नमः॥

होमः -

ॐ ज्ञानानन्दमयं देवं निर्मलंस्फटिकाकृतिं
आधारं सर्व विद्यानां हयग्रीवमुपास्महे। स्वाहा।
ॐ ऋग्यजुस्सामरूपाय वेदाहरणकर्मणे
प्रणवोद्गीतवचसे महास्व शिरसे नमः॥ स्वाहा।
ॐ ततश्चाविरभूसाक्षात् श्रीरमाभगवत्परा।
रञ्चयन्तीदिशः कान्त्या विद्युद् सौदामनीयथा॥ (3 वारम्)

ॐ नमो भगवते सुदर्शनाय, भो भो सुदर्शन! दुष्टं दारय दारय दुरितं हन हन पापं दह दह रोगं मर्दय मर्दय आरोग्यं कुरु कुरु ॐ ॐ ह्रां ह्रां ह्रीं ह्रीं ह्रूं ह्रूं फट् फट् दह दह हन हन भीषय भीषय स्वाहा।

ॐ सुदर्शनाय विद्महे हेतिराजाय धीमहि। तन्नश्चक्रः प्रचोदयात्। स्वाहा।

ॐ अग्नये सृष्टकृतये स्वाहा।

पूर्णाहुतिः -

ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत वस्नेव विक्रीणा वहा इषमूर्ज ँ शतक्रतो॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।

पूर्णस्य पूर्णमादय पूर्णमेवा वशिष्यते। ॐ सर्व वै पूर्ण ँ स्वाहा।

वसोर्धारा-

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्।

देवस्त्वा सविता पुनातु व्वसो पवित्रेण शतधारेण सुप्वा कामधुक्षः स्वाहा।

भोग -

ॐ नाभ्या आसीदन्तरिक्ष ँ शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रत्तथा लोकाँ२ अकल्पयन्॥

ॐ त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये।
गृहाण सुमुखो भूत्वा प्रसीद परमेश्वर॥

ॐ प्राणय स्वाहा। ॐ अपानाय स्वाहा। ॐ व्यानाय स्वाहा।
ॐ उदानाय स्वाहा। ॐ समानया स्वाहा। ॐ अग्नये स्वाहा ।

वक्त्राब्जे भाग्यलक्ष्मीः करतलकमले सर्वदातार्थ लक्ष्मीः
दोर्दण्डे वीरलक्ष्मीः हृदयसरसिजे भूतकारुण्यलक्ष्मीः
संङ्ग्रामे शौर्यलक्ष्मीः निखिलगुणगणा डमबरे कीर्तिलक्ष्मीः
सर्वाङ्गे सौम्यलक्ष्मीः मयि सुविजयतां सर्वसाम्राज्यलक्ष्मीः
त्र्यायुषञ्जमदग्नेः कश्यपस्यत्र्यायुषम्।
यद्देवेषुत्र्यायुषन्तन्नो अस्त्त्र्यायुषम्।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन।
यत्पूजितं मया देव परिपूर्ण तदस्तु मे॥
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर॥

॥ जय श्रीमन्नारायण॥

॥श्रीमते रामानुजाय नमः॥
॥श्रियै नमः॥श्रीधराय नमः॥
॥श्रीविजयलक्ष्मीसमेतसुदर्शनचक्रराजपरब्रह्मणे नमः॥

[illegible]

आरती

सुमङ्गलं मङ्गलमीश्वराय ते सुमङ्गलं मङ्गलमच्युताय ते।
सुमङ्गलं मङ्गलमन्तरात्मने सुमङ्गलं मङ्गलमब्जनाभ ते॥

सुमङ्गलं श्रीनिलयोरुवक्षसे सुमङ्गलं पद्मभवादिसेविते।
सुमङ्गलं पद्मजगन्निवासिने सुमङ्गलं चाश्रितमुक्तिदायिने॥

चाणूरदर्पघ्नसुबाहुदण्डयोः सुमङ्गलं मङ्गलमादिपूरुषे।
बालार्ककोटिप्रतिभाय ते विभो चक्राय दैत्येन्द्रविनाशहेतवे॥

शंखाय कोटीन्दुसमानतेजसे शार्ङ्गाय रत्नोज्ज्वलदिव्यरूपिणे।
खड्गाय विद्यामयविग्रहाय ते सुमङ्गलं मङ्गलमस्तु ते विभो॥

तदावयोस्तत्वविशिष्टशेषिणे शेषित्वसम्बन्धनिबोधनाय ते।
यन्मङ्गलानां च सुमङ्गलाय ते पुनः पुनर्मङ्गलमस्तु संततम्।

पुष्पाञ्जलीः-

हरिःॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्॥ तद्विप्रासो विपन्यवो जागृवाꣳसः समिन्धते। विष्णोर्यत्परमं पदम्॥ पर्याप्त्यानन्तरायाय सर्वस्तोमोतिरात्र उत्तममहर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति। हरिःॐ शान्तिः शान्तिः शान्तिः॥

ॐ सुगन्धवल्लीशतपत्रजातीसुवर्णचम्पावकुलोद्भवानि ।
गृहाण देवेश मयार्पितानि प्रभो हरे श्रीतुलसीदलानि ॥

ॐ केशवाय नमः	ॐ नारायणाय नमः	ॐ माधवाय नमः
ॐ गोविन्दाय नमः	ॐ विष्णवे नमः	ॐ मधुसूदनाय नमः
ॐ त्रिविक्रमाय नमः	ॐ वामनाय नमः	ॐ श्रीधराय नमः
ॐ हृषीकेशाय नमः	ॐ पद्मनाभाय नमः	ॐ दामोदराय नमः
ॐ वासुदेवाय नमः	ॐ संङ्कर्षणाय नमः	ॐ प्रद्युम्नाय नमः

ॐ अनिरुद्धाय नमः ॐ पुरुषोत्तमाय नमः ॐ अधोक्षजाय नमः
ॐ नारसिंहाय नमः ॐ जनार्दनाय नमः ॐ उपेन्द्राय नमः
ॐ हरये नमः ॐ श्रीकृष्णाय नमः
ॐ रुक्मिणीसत्यभामासमेत श्रीवेणुगोपालस्वामिने नमः॥
ॐ श्रियै नमः ॐ अमृतोद्भवायै नमः ॐ कमलायै नमः
ॐ चन्द्रसहोदर्यै नमः ॐ विष्णुपत्न्यै नमः ॐ वैष्णव्यै नमः
ॐ वरारोहयै नमः ॐ हरिवल्लभायै नमः ॐ शार्ङ्गिण्यै नमः
ॐ देवदेविकायै नमः ॐ लोकसुन्दर्यै नमः ॐ महालक्ष्म्यै नमः।
ॐ श्री देव्यै नमः ॐ भूदेव्यै नमः। ॐ नीलादेव्यै नमः
ॐ गोदादेव्यै नमः। ॐ श्री रङ्गनायक्यै महालक्ष्म्यै नमः॥
ॐ अस्मद्गुरुभ्यो नमः ॐ अस्मद्परमगुरुभ्यो नमः ॐ अस्मद्सर्वगुरुभ्यो नमः
ॐ श्रीमते रामानुजाय नमः ॐ श्री परांकुशदासाय नमः ॐ श्रीमद्यामुनमुनये नमः
ॐ श्रीराममिश्राय नमः ॐ पुण्डरीकाक्षाय नमः ॐ श्रीमन्नाथमुनये नमः
ॐ श्रीमते शठकोपाय नमः ॐ श्रीमते विष्वक्सेनाय नमः ॐ श्री श्रियै नमः
ॐ श्री श्रीधराय नमः

ॐ समस्तपरिवारविशि[illegible] स[illegible]देव[illegible] श्रीमते नारायणाय नमः॥
नृत्यगाद्यादिगी[illegible]पुरा[illegible]पठनादिभिः। राजोपचारैस्सकलैस्संतुष्टो भव राघव॥
संतुष्टो भव माधव। संतुष्टा भव माधवि॥

**शित्तम् शिरुधाले वन्दुन्नैच्चेवित्तु*
उन् पोत्तामरै यडिये पोत्तुम् पोरुळ् केळाय्*
पेत्तम् मेय्त्तुण्णुम् कुलत्तिल् पिरन्दु*
नीकुत्तेवलेङ्गळै क्कोल्ळामर्पोगादु*
इत्तै प्परै घोल्वानन्नु घाणं गोविन्दा!*
एत्तैक्कु मेळेळं पिरविक्कुम्*
उन्दन्नोडु उत्तोमे यावोमुनक्के नामाळ्शेय्वोम*
मत्तै नङ्गामंगल् मात्तेलो रेम्बावाय्*

**वङ्गक्कडल् कडैन्द माधवने क्केशवनै*
तिंगळ् तिरूमुहत्तु च्चेयिळैयार् शेन्निरैञ्जि*
अङ्गप्परै घोण्डवात्तै*
अणि पुदुवै प्पेङ्कगमलत्तण्डेरियल् पट्टर्भिरान् गोदै शोन्न*
शङ्गत्तमिळं.मालै मुपदुम् तप्पामे*